| | | | |
|---|---|---|---|
| कातव्यम् , | कापयितव्यम् , | चिकासितव्यम् , | चाकायितव्यम् ; |
| कानीयम्- [1]प्रकाणीयम् , | कापनीयम् , | चिकासनीयम् , | चाकायनीयम् ; |
| [2]केयम् , | काप्यम् , | चिकास्यम् , | चाकाय्यम् ; |
| [3]ईषत्कानः-दुष्कानः-सुकानः ; | | — | — |
| कायमानः, | काप्यमानः, | चिकास्यमानः, | चाकाय्यमानः ; |
| कायः, | कापः, | चिकासः, | चाकायः ; |
| कातुम् , | कापयितुम् , | चिकासितुम् , | चाकायितुम् ; |
| कातिः- [4]प्रका, | कापना, | चिकासा, | चाकाया ; |
| [5]प्रनिकानम् , | कापनम् , | चिकासनम् , | चाकायनम् ; |
| कात्वा, | कापयित्वा, | चिकासित्वा, | चाकायित्वा ; |
| प्रकाय, | प्रकाप्य, | प्रचिकास्य, | प्रचाकाय्य ; |
| कायम् २, कात्वा २, | कापम् २, कापयित्वा २, | चिकासम् २, चिकासित्वा २, | चाकायम् २ ; चाकायित्वा २; |

[6]काकः.

## (264) " क्नथ हिंसायाम् " (I-भ्वादिः-४००. सक. सेट्.पर. घटादिः।)

| | | | |
|---|---|---|---|
| क्नाथकः-थिका, | [7]क्नथकः-थिका, | चिक्नथिषकः-षिका, | [8]चाक्नथकः-थिका; |
| क्नथिता-त्री, | क्नथयिता-त्री, | चिक्नथिषिता-त्री, | चाक्नथिता-त्री ; |
| [9]व्यतिक्नथन्-न्ती, | क्नथयन्-न्ती, | चिक्नथिषन्-न्ती ; | — |
| क्नथिष्यन्-न्ती-ती, | क्नथयिष्यन्-न्ती-ती, | चिक्नथिषिष्यन्-न्ती-ती ; | — |

---

1. 'कृत्यचः' (8-4-29) इति णत्वम् ।
2. 'अचो यत्' (3-1-97) इति यति, 'ईद्यति' (6-4-65) इति धात्वाकारस्य ईकारे च गुणः ।
3. 'आतो युच्' (3-3-128) इतीषदादिषूपपदेषु खलपवादो युच् ।
4. 'आतश्चोपसर्गे' (3-3-106) इति स्त्रियामङ् ।
5. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति पर्युदासाण्णत्वं न ।
6. 'इण्भीकापा—' [ द. उ. 3-21 ] इत्यादिना कन् प्रत्ययः । काकः=वायसः ।
7. 'घटादयो मितः' (ग. सू. भ्वादौ) इति मित्त्वात् णौ 'मितां ह्रस्वः' (6-4-92) इति उपधायाः ह्रस्वः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
8. 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घः ।
9. 'न गतिहिंसार्थेभ्यः' (1-3-15) इति कर्मव्यतीहारेऽपि आत्मनेपदं न ।